दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-3 ■ अङ्क-239

1 22.06.2024 शनिवासरः वि.सं. २०८० आषाढ़कृष्णप्रतिपदा आषाढः 9 प्रविष्टांशः
Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## बाङ्गलादेशस्य प्रधानमन्त्री शेखहसीना द्विदिवसीययात्रार्थे नवदिल्लीनगरम् आगता




बांग्लादेशीया प्रधानमन्त्री शेख हसीना-इत्येषा अद्यारभ्य भारतस्य द्विदिवसीय यात्रां प्रति आयाति। स्व-यात्रावधी प्रधानमन्त्रिणा नरेन्द्र मोदिना सह द्विपक्षीयविचारविमर्शान् अतिरिच्य सा राष्ट्रपतिना द्रौपदीमुर्मु इत्यनया उपराष्ट्रपतिना जगदीपधनखडेन च सह मेलनं करिष्यति। विदेशमन्त्रिणा एस. जयशंकरेण सह तस्याः पारस्परिकोपवेशनं सुनिश्चितं अस्ति।

## मद्यनीतिप्रबंधना प्रकरणे मुख्यमंत्रिणः केजरीवालस्य याचिका स्थगिता कृता - दिल्ली उच्चन्यायालयः



दिल्ली-उच्चन्यायालयेन कथितं मद्य-नीति-प्रकरणे मुख् यमंत्रीणः अरविंद केजरीवालस्य मुक्ति-याचिका स्थगिता। न्यायालयेन प्रोक्तं यत् मुख् यमंत्रीणम् अरविंद केजरीवालम् मुक्ति-दातुं विशेष न्यायालयस्य आदेशं तथावत् प्रभार्थी न भविष्यति यथावत् सः अस्मिन् प्रकरणे प्रवर्तन निदेशालयस्य समाह्वान याचिकासु वादश्रवणं न करिष्यति। विरामः

## नीटपरीक्षायाः अंतर्गतं जायमाना प्रक्रिया निवर्तिता




सर्वोच्च न्यायालयः चिकित्सक-स्नातक-प्रवेश-परीक्षाया (नीट-यूजी) अस्मिन् वर्षे जायमानां काउंसलिंगा चयन)-प्रक्रियां निवर्तयितुं निरस्तीकृतवान् । तथा च राष्ट्रीय परीक्षा-संस्थानां सूचना-पत्रम् अपि प्रेषितवान्। न्यायालयः नूतनां याचिकां विद्यमान-याचिकाभिः सह सम् बद्धं कृत्वा वादश्रवण-प्रक्रिया जुलाई मासस्य अष्टदिनांके भविष्यति इति निर्णयं कृतवान्।

## प्रधानमन्त्री नरेन्द्रमोदी अन्ताराष्ट्रीययोगदिवसस्य अवसरे जम्मू-कश्मीरस्य श्रीनगरात् उत्सवस्य नेतृत्वं कृतवान्





**हिमसंस्कृतवार्ताः।** दशमः अन्ताराष्ट्रिय-योगदिवसः सम्पूर्ण विश्वे परिपालितः। प्रमुखकार्यक्रमः जम्मूकश्मीरस्य श्रीनगरस्य शेर-कश्मीर- अन्ताराष्ट्रिय-सम्मेलनकेन्द्रे आयोजितवान्। प्रधानमन्त्री नरेन्द्रमोदी श्रीनगरतः अस्य कार्यक्रमस्य नेतृत्वं कृतवान्। आहत्य सप्तसहस्रं जनाः प्रधानमन्त्रिणा सह डलजलाशय तटे एकत्रिताः अभवन्। प्रधानमन्त्रिणाः नेतृत्वयुते एतस्मिन् कार्यक्रमे जम्मूकश्मीरस्य उपराज्यपालः मनोजसिन्हाः केन्द्रीयमन्त्री प्रतापराव गणपतरावजाधवः अन्येच गणमान्याः जनाः उपस्थिताः असीत्। अस्य वर्षस्य योगदिवसस्य शीर्षको वर्तते स्वस्मै समाजाय च योगः इति अस्य कार्यक्रमस्योद्देश्यं योगाभ्यासद्वारा वैश्विक स्वास्थ्य-कल्याणं च संवर्धयितुं सहसाधिक प्रतिभागिनां एकत्रीकरणं अभवत्। कार्यक्रमावधी प्रधानमन्त्री जनसभागमपि सम्बोधितवान्। अपिच सामान्ययोगमपि सम्बोधितवान्। अपिच सामान्ययोगसत्रे भागं भजितवान् यस्मिन् शारीरिक-मानसिक-आध्यात्मिकविकासस्य प्रतिपोषणे योगमहत्वं प्रतिपादितम्। प्रधानमंत्री नरेन्द्र मोदी जम्मूकश्मीरस्य द्विदिवसीययात्रायां अस्ति। श्रीमोदी पञ्चशताधिकैकसहस्रकोटि-रूप्यकाणां चतुरशीतिः प्रमुखासां विकासपरियोजनानां शिलान्यास उद्घाटनं कृतवान्।

## वित्तमन्त्री निर्मला सीतारमणः अद्य नवीदिल्लीनगरे ५३ तमायाः जीएसटीपरिषद- सभायाः अध्यक्षतां करिष्यति

हिमसंस्कृतवार्ताः - प्रवीण कुमारः वित्तमंत्री निगमकार्यमन्त्री च निर्मला सीतारमणः अद्य नवीदिल्लीनगरे ५३ तमा- जीएसटीपरिषद-सभायाः अध्यक्षतां करिष्यति। नूतनसर्वकारस्य निर्माणानन्तरं जीएसटी परिषदस्य एषा प्रथमा सभा अस्ति।



जीएसटी-परिषदस्य अन्तिमसभा गतवर्षस्य अक्तूबरमासस्य ७ दिनाङ्के अभवत्। अस्मिन् काले परिषदेन अनेके निर्णयाः कृताः आसन्। जीएसटी परिषद इत्यनेन प्रस्तावितानां जीएसटी अपीलीय-न्यायाधिकरणानाम् अध्यक्षस्य सदस्यानां च नियुक्तेः पात्रतायाः आयुः च विषये संशोधनस्य अनुशंसा कृता आसीत्। परिषद- इत्यनेन बाजरापिष्टात् निर्मितानाम् आहारस्य शून्यदरः अपि अनुशंसिता आसीत्। इक्षुकृषकाणां कृते बकाया शीघ्रं भुक्तिं कर्तुं, पशुभोजनस्य निर्माणस्य व्ययस्य न्यूनीकरणाय च गुडस्य जीएसटी २८ प्रतिशतात् ५ प्रतिशतं यावत् न्यूनीकर्तुं परिषदः अपि निर्णयं कृतवती आसीत्।

## हजयात्रिकाणां स्वास्थ्यसेवासम्बद्धं प्रारुपं केन्द्रीयस्वास्थ्यमन्त्रालयेन प्रकाशितम्

हिमसंस्कृतवार्ताः। केन्द्रीयस्वास्थ्यमन्त्रालयेन हजयात्रिकाणां स्वास्थ्यसेवासम्बद्धं प्रारुपं प्रकाशितम्। हजतीर्थयात्रिकाणां कृते चिकित्सासेवाव्यवस्था इति शीर्षकेण प्रारुपं विमोचयन् स्वास्थ्यसचिवः अपूर्वचन्द्रः अवदत् यत् प्रारुपे सऊदी अरबदेशे भारतीयहजतीर्थयात्रिकाणां कृते व्यापकस्वास्थ्यसेवाव्यवस्थायाः रूपरेखा कृता अस्ति। सः अवदत् यत् अस्मिन् वर्षे ४० सहस्राणि वृद्धैः सहितं १ लक्षं ७५ सहस्राधिकाः जनाः हजयात्राम् अकुर्वन् किञ्च द्विलक्षाधिकानां जनानां ओपीडी आवश्यकी अस्ति। चिकित्सादलानि अपि तीर्थयात्रिकान् मिलितवन्तः ।




## सुभाषितम्

**उत्थातव्यं जागृतव्यं**
**योक्तव्यं भूतिकर्मसु।**
**भविष्यतीत्येव मनः**
**कृत्वा सततमव्यथैः।।**

(महाभारत, उद्योगपर्व - १३५/२९)

भावार्थ- सफलता होगी ही, ऐसा मन में दृढ़ विश्वास करके, सतत विषाद-रहित होकर तुझे (मनुष्य को) उठना चाहिए, सजग होना चाहिए और ऐश्वर्य की प्राप्ति कराने वाले कार्यों में लग जाना चाहिए।

हिमसंस्कृतवार्ताः, अमितशर्मा

## हिमसंस्कृतवार्ताः सामान्यज्ञानम्

**प्र. चकारस्य उच्चारणस्थानमस्ति?**
उत्तर : तालुः
**प्र. मेघदूतम् कस्य रचना अस्ति ?**
उत्तर : कालिदासस्य
**प्र. रामायणे कति श्लोकाः सन्ति ?**
उत्तर : २५०००
**प्र. सुन्दरकाण्डः कस्मिन् ग्रन्थे अस्ति ?**
उत्तर : रामायणे
**प्र. अन्ताराष्ट्रीययोगदिवसः कदा भवति ?**
उत्तर : २१ जूनदिनाङ्के

शिवानी शर्मा, हिमसंस्कृतवार्ताः

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## टैनिस क्रीडायां भारतस्य अंकिता रैना स्विटजरलैण्ड-देशस्य सुसान बंदेची इत्यनेन सह स्पर्धयिष्यते



टेनिस् क्रीडायां अद्य सायं इटली-देशस्य गाइबा-नगरे डब्ल्यूटीए बेनेटो-ओपन टेनिस-स्पर्धाश्रृखलायाः महिला-एकल-प्रामुपान्त्यचक्रे भारतस्य अंकिता रैना स्विटजरलैण्ड-देशस्य सुसान बंदेची इत्यनेन सह स्पर्धयिष्यते। प्र-प्रागुपान्त्य-चक्रे अंकिता रोमानिय देशस्य इरिना बारां षड्-द्वि, द्वि-षड्, षड्-शून्य अंकैः पराजितवती।

## विश्व-संगीत दिवसः

शुक्रवासरे विश्व-संगीत-दिवसः आचरितः। एषः दिवसः 'फेत डे ला म्यूजिक इत्यनेन नामना अपि प्रसिद्धः अस्ति अयं वार्षिकः उत्सवः वर्तते चा संगीतस्य शक्ति तस्य सार्वत्रिकं भाषां च प्रवर्धयति। विश्व संगीत दिवसे विश्वस्य संगीतकाराः संगीतप्रेमिणः च एकास्थले आगत्य विभिन्नं संगीत-विधानानां प्रदर्शनं कृत्वा आनन्दं लभन्ते।

# HP Bye Election: देहरातः कमलेश, होशियारसिंहः च हमीरपुरतः डॉ. पुष्पेन्द्रवर्मा नामांकनं कृतवन्तः





**हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।**
देहराविधानसभातः मुख्यमंत्रिणः सुखविंदरसिंहसुक्खोः पत्नी एवं कांग्रेसप्रत्याशी कमलेशठाकुर शुक्रवासरे नामांकनं पूरितवती। अस्मिन्नवसरे मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः काङ्ग्रेसप्रदेशाध्यक्षा प्रतिभासिंह च उपस्थितौ आस्ताम्। तस्मिन् एव काले निर्दलीयरूपेण निर्वाचनं प्रतिस्पर्धयितुं घोषितः पूर्वकाङ्ग्रेस-प्रत्याशी राजेशशर्मा अपि नामाङ्कनसमये उपस्थितः आसीत्। तत्रैव भाजपा प्रत्याशी होशियारसिंहः अपि देहरा विधानसभा उपनिर्वाचनार्थं नामाङ्कनं कृतवान्। हमीरपुर विधानसभासनतः डॉ. पुष्पेन्द्रवर्मा अपि शुक्रवासरे हमीरपुरे नामाङ्कनं कृतवान्। हमीरपुर विधानसभानिर्वाचनक्षेत्रे आयोजितस्य उपनिर्वाचनस्य काङ्ग्रेसस्य प्रत्याशी डॉ. पुष्पेन्द्र वर्मा शुक्रवासरे हमीरपुरविधानसभायाः एसडीएम तथा निर्वाचनपदाधिकारिणः समक्षं नामांकनपत्रं प्रवेशितवान्। अस्मिन्नवसरे सुजानपुरस्य विधायकः कप्तान रंजीतराणा, डॉ. वर्मणः पत्नी, तस्य पिता पूर्वमंत्री रंजीत वर्मा च उपस्थिताः अभवन्। ततः पूर्वं गांधीचतुष्पथि विशालसभायाः आयोजनं कृतम् आसीत् यस्मिन् मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः, उपमुख्यमंत्री मुकेश अग्निहोत्री तथा काङ्ग्रेसप्रदेशाध्यक्षा प्रतिभासिंह तथा दलस्य अधिकारिणः कार्यकर्तारः च उपस्थिताः आसन्। अस्मिन् अवसरे डॉ. पुष्पेन्द्रवर्मा इत्यनेन उक्तं यत् एतद् हमीरपुरस्य जनानां उपरि आरोपितम् निर्वाचनम् अस्ति। पूर्वनिर्दलीयविधायकस्य भाजपाराजनैतिकविपण्यां विक्रीयमाणस्य कारणेन एतत् अभवत्। सः अवदत् यत् अहं १४ मासेभ्यः यावत् जनसेवाम् कुर्वन् अस्मि। डॉ. वर्मा अवदत् यत् एतद् तस्कर-जनतायाः मध्ये युद्धम् अस्ति, यस्मिन् जनशक्तिः भवतः आशीर्वादेन धनशक्तिं अवश्यमेव जिगीषति। अस्मिन् अवसरे मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः काङ्ग्रेस-प्रत्याशिनः कृते जनसमूहात् समर्थनं याचितवान्। मुख्यमंत्री उक्तवान् यत् नेताप्रतिपक्षः जयराम ठाकुरः सर्वकारस्य निर्माणस्य स्वप्नदर्शनं त्यक्तुम् अर्हति। अस्माकं ३८ विधायकाः सन्ति। डॉ. पुष्पेन्द्र वर्मा उक्तवान् यत् उच्चन्यायालये प्रचलति सीपीएस-प्रकरणस्य विषये जयरामः जनान् भ्रामयति। जयरामः स्वस्य नवविधायकानां विषये चिन्तां कुर्यात्, येषां विरुद्धं विधानसभासभापतिं प्रति याचिका लम्बिता अस्ति। यदि एते नव विधायकाः अयोग्याः भवन्ति तर्हि ते केवलं एकेन वा द्वयोः वा त्रुटिभिः पुनः निर्वाचने विजयं प्राप्नुयुः। यस्य कारणात् काङ्ग्रेसविधायकानां संख्या ५० यावत् भवितुम् अर्हति। सः अवदत् यत् पूर्वस्वतन्त्रः विधायकः हमीरपुरस्य बृहत्तमः खननतस्करः अस्ति। काङ्ग्रेसप्रदेशाध्यक्षा प्रतिभासिंह उपमुख्यमंत्री मुकेश अग्निहोत्री च मञ्चात् काङ्ग्रेसप्रत्याशिने समर्थनं याचितवन्तौ।

# NTT Recruitment:

## हिमाचले प्रारम्भिकबालपरिचर्या एवं शिक्षाप्रशिक्षकाणां नियुक्त्यर्थं सज्जता




**हिमसंस्कृतवार्ताः - शिमला।** ये हिमाचलप्रदेशे द्विवर्षीयं नर्सरीशिक्षकप्रशिक्षणं कुर्वन्तः प्रारम्भिकबालपालन-शिक्षाप्रशिक्षकाः भविष्यन्ति। मन्त्रिमण्डलस्य सभायाम् अनुमोदनानन्तरं शिक्षाविभागेन हिमाचले ६२९७ नियुक्त्यर्थं नियमान् निर्मातुं सज्जता आरब्धा।

आङ्गनवाडीकार्यकर्तृभ्यः षण्मासात्मकं सेतुपाठ्यक्रमं प्रदातुं योजना अपि अस्ति। सर्वकारीयविद्यालयेषु नर्सरी- केजी-छात्राणां परिचर्यायै प्रशिक्षकाणां नियुक्तिः कर्तव्या अस्ति। एषः प्रस्तावः प्रायः वर्षत्रयं यावत् सञ्चिकासु अटत्। अधुना सर्वकारेण नियुक्त्यर्थम् अनुमोदनं कृतम् अस्ति।

अधुनैव आयोजितायां मन्त्रिमण्डलस्य सतभायां बालकानां कृते उत्तमशिक्षां प्रदातुं शिक्षाविभागे ६२९७ प्रारम्भिकबालपालनशिक्षाप्रशिक्षकाणां नियुक्तिः कृता इति निर्णयः कृतः। गुरुवासरे सचिवालये मीडियाभिः सह वार्तालापं कुर्वन् शिक्षामन्त्री रोहितठाकुरः अवदत् यत् ये वर्षद्वयं नर्सरीशिक्षकप्रशिक्षणं कृतवन्तः तेषां नियुक्तौ प्राथमिकता भविष्यति।

एताः नियुक्तयः केन्द्रसर्वकारस्य नियमानुसारं कर्तव्याः सन्ति। केवलं ते एव तस्मिन् समाविष्टाः भविष्यन्ति ये पञ्जीकृतसंस्थाभ्यः एनटीटी कृतवन्तः। आंगनबाडीकार्यकर्तृणां विषये विभागीयस्तरस्य अपि चर्चा प्रचलति। विचारः अस्ति यत् तेषां षड्मासात्मकं सेतुपाठ्यक्रमं करणीयम्, यद्यपि अस्मिन् विषये कोऽपि निर्णयः न कृतः।

# लघ्वीकाश्यां मण्ड्यां बिजन-ढलवानविद्यालये आचरितः योगदिवसः



हिमसंस्कृतवार्ता - लघ्वीकाशी मण्डी।
अखिले देशे अन्ताराष्ट्रीययोगदिवसः प्रायोगिकरूपेण आचरितः। यस्मिन् क्रमे हिमाचलस्य सर्वेषु जनपदमुख्यालयेषु जनपदस्तरीयाः कार्यक्रमाः अभवन्। लघ्वीकाश्यां मण्ड्यामपि ऐतिहासिके सेरीमञ्चे जिलास्तरीयम् आयोजनमभवत्। तत्रैव प्रदेशस्य सर्वकारीयेषु विद्यालयेषु अपि योगदिवसः महता उत्साहेन आचरितः। अस्मिन् क्रमे मण्डी जनपदस्य राजकीय-उच्च- पाठशालायां बिजन-ढलवाने मुख्याध्यापिकायाः मोनिकाठाकुरायाः सान्निध्ये योगदिवसः आचरितः। यस्मिन् विद्यालयस्य शारीरिकशिक्षकः दिनेशकुमारः विविधान् योगासनान् कारितवान् तथा च शिक्षिका अंजलिशर्मा प्राणायामस्य विविधान् विधीन् कारितवती। विद्यालयस्य संस्कृतशिक्षकः डॉ. मनोज शैलः योगस्य महत्वं जीवने उपादेयता च इति प्रतिपादितवान्। मुख्याध्यापिका मोनिका ठाकुर अवदत् यत् वर्तमाने परिप्रेक्ष्ये स्वस्थजीवनाय योगस्य व्यायामस्य च अत्यावश्यकता वर्तते। यथा जीवितु भोजनम् आवश्यकं तथैव स्वस्थरूपेण जीवितुं योगः आवश्यकः। केवलं योगदिवसे एव योगाभ्यासः मा भवेत् अपितु अस्मिकं दैनंदिनजीवने योगस्य समावेशः स्यात्। तदैव सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः..... वाक्यमिदं सार्थकं भविष्यति। योगसत्रानन्तरं छात्रैः योगस्य महत्वमभिलक्ष्य विविधानि स्फोरकपत्राणि अपि निर्मितानि।

## सावित्री राजकीय-उच्च-पाठशालायाः बिजन-ढलवानस्य एसएमसी-अध्यक्षा जाता सर्वसम्मत्या अभवत् चयनम्



हिमसंस्कृतवार्ताः – लघ्वीकाशी मण्डी। समग्रशिक्षाभियानस्य हिमाचलप्रदेशस्य परियोजना- निदेशकस्य निर्देशानुसारं राजकीय- उच्च- पाठशालायाः बिजन-ढलवानस्य विद्यालयप्रबन्धनसमित्याः (एसएमसी) सधारणसभायाः गोष्ठी २१-०६-२०२४ दिनाङ्के राजकीयोच्चविद्यालये बिजन-ढलवाने मुख्याध्यापिकायाः अध्यक्षतायां सम्पन्ना। यस्यां पूर्वतनकार्याणां समीक्षा कृता। रचनात्मक-आकलनस्य प्रस्तुतिकरणम् अपि च अग्रिमत्रिवर्षेभ्यः विद्यालयप्रबन्धनसमित्याः सङ्घटनम् कृतम्। यस्मिन् चन्द्रावती अध्यक्षाय सावित्र्याः नाम प्रस्तुतवती तथा उपस्थितैः सदस्यैः सर्वसम्मत्या सावित्र्याः नाम्नः समर्थनं कृतम्। अतः सावित्री देवी सर्वसम्मत्या एसएमसी- अध्यक्षा निर्वाचिता, अनेनैव विजयकुमारः, गोपालः, ममता देवी, वीना कुमारी, सोना देवी, मंघरी देवी एते अभिभावकाः कार्यकारी सदस्याः तथा च पिंकी देवी, कुलदीपः च अध्यापकसदस्यौ अधिकृतौ। नवनिर्वाचिता अध्यक्षा अवदत् यत् शिक्षायाः सार्वभौमिकरणाय तथा राष्ट्रीयशिक्षानीतौ अभवत् परिवर्तनेन साकं निर्धारिताणां लक्ष्याणां विद्यालये प्राप्तुं किञ्च छात्राणां शैक्षणिकोपलब्धौ उन्नयनाय सामुदायिक-सहभागितायाः वर्धने सार्थकप्रयासाः करिष्यन्ते। विद्यालयस्य मुख्याध्यापिकया मोनिकाठाकुर द्वारा नवनिर्मितायाः कार्यसमित्याः अभिनन्दनं कृतम्। अपि च विद्यालयप्रबन्धन-समित्याः के के कर्तव्याः कानि च कार्याणि इत्यपि बोधितम्।

# विकसितभारतस्य संकल्पना योगेन पूर्णा भविष्यति – कुलपति प्रो. निवासवरखेड़ी

**हिमसंस्कृतवार्ताः,डॉ.अमनदीपशर्मा २२ जून, कांगड़ा हि.प्र.**



अन्ताराष्ट्रीययोगदिवसस्य शुभावसरे केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली इत्यस्य हिमाचलप्रदेशे स्थिते वेदव्यासपरिसरे विविधानां यौगिकक्रियाकलापानाम् आयोजनम् अभवत्। प्रातः ०६.१५ वादनात् आरभ्य रात्रिं यावत् परिसरस्य वातावरणं योगमयम् अभवत्। उद्घाटनकार्यक्रमे राष्ट्रीयस्वंयसेवकसंघस्य अखिलभारतीयप्रचारटोली प्रमुखः मुकुलकानिटकरः मुख्यातिथित्वेन प्रतिभागितां कुर्वन् स्वकीये सम्बोधने उक्तवान यत् भारते सूर्यनमस्कारस्य १८ प्रकाराः प्रचलने सन्ति। तेनोक्तं यत् योगः शारीरिकक्रिया न अपितु मानसिकक्रिया अस्ति। मानसिकचिन्तने परिष्कारः, पवित्रता च योगस्य पर्यायः भवितुमर्हति। तेनोक्तं यत् अन्ताराष्ट्रीययोगस्य परिकल्पना भारतं विश्वगुरुत्वेन स्थापयन्नस्ति। अस्मिन् क्रमे केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासवारखेड़ीवर्यः स्वसम्बोधने उक्तवान् यत् अस्माभिः सङ्कल्पः करणीयः यत् २०४७ पर्यन्तं विश्वस्य सर्वेषु देशेषु सर्वेषु मानवेषु च योगस्य माहात्म्यं गच्छेत्, येन आविश्वे जायमानानां समस्यानां समाधानं भवेत् । तेनोक्तं यत् विकसितभारतस्य संकल्पना योगद्वारा एव पूर्णा भविष्यति। कार्यक्रमस्य द्वितीयसत्रस्य शुभारम्भः वैदिकमंगलाचरणेन सरस्वत्यापूजनेन चाभवत्। बलाहरपरिसरस्य निदेशिका प्रो.सत्यकुमारी सर्वेषां स्वागतं कृतवती। सत्रेऽस्मिन् १८ जूनदिनाङ्कात् आरभ्य २० जूनपर्यन्तं जायमानासु राष्ट्रीयप्रतियोगितासु प्रथमद्वितीयतृतीयस्थानं प्राप्तवन्तः भारतस्य विविधेभ्यः कोणेभ्यः समागताः प्रतिभागिनः पुरस्कृताः।

अस्मिन् सत्रे डॉ.सत्यदेवः कुशलमञ्चसञ्चालनं कृतवान। कार्यक्रमेऽस्मिन् परिसरस्य विभिन्नानां विभागानां पत्रिकाणामपि विमोचनं जातम्, तत्रैव विद्याभारती संस्था हिमाचलप्रदेशः केन्द्रीयविश्वविद्यालयः, नवदेहली इत्यनयोः संस्थयोः मध्ये एमओयू इति हस्ताक्षराणि जातानि। कार्यक्रमे विशिष्टातिथिषु प्रो.बनमालीमिश्रमहोदयः प्रो.मदनमोहनझा सदृशाः गणमान्या उपस्थिता आसन्। अत्रैव प्रो.मदनमोहनझावर्यस्य निर्देशने सामाजिकानां कृते संस्कृतम् ओपम्पियाड इत्यस्य प्रकल्पस्य शुभारम्भः कुलपतेः करकमलाभ्यां जातः। ज्ञातव्यं यत् अन्तर्राष्ट्रीययोगमहोत्सवस्य शुभावसरे देशस्य विभिन्नराज्येभ्यः प्रायः २०० प्रतिभागिनः मार्गदर्शकैः सह वेदव्याससङ्कुलस्य बलाहारे उपस्थिताः आसन्, ये विभिन्नप्रकारस्य योगमुद्राभिः सर्वान् प्रभावितं कृतवन्तः। अस्मिन् काले अतिथिभिः सह विश्वविद्यालयस्य मार्गदर्शकाः, प्राध्यापकाः, प्रतिभागिनः, कर्मचारिणश्च सामूहिकरूपेण योगस्य अभ्यासं कृतवन्तः । अस्य भव्यकार्यक्रमस्य संयोजकः डॉ. पुरुषोत्तमः सर्वेषाम् आभारं प्रकटितवान्। कार्यक्रमे प्रो.मञ्जुनाथभट्टः, प्रो.शीशरामः इत्यादयः गणमान्या उपस्थिता आसन्।





### विद्यालयस्तरे योगस्पार्धासु प्राप्तपुरस्काराः

1. शिखाशर्माः (प्रथमपुरस्कारः)
2. आकांक्षीः (द्वितीयपुरस्कारः)
3. आदित्यतिवारीः (तृतीयपुरस्कारः)
4. तन्वीशर्माः (सान्तवनापुरस्कारः)

### परिसरस्तरे पुरुषयोग-स्पर्धासु प्राप्तपुरस्काराः -

1. चिरागशर्मा (प्रथमपुरस्कारः,श्रीरघुनाथकीर्तिपरिसरः
2. मुकेशः (द्वितीयपुरस्कारः, लखनऊपरिसरः)
3. साहिलः (द्वितीयपुरस्कारः, वेदव्यासपरिसरः)
4. नीलामणिः (तृतीयपुरस्कारः, शृङ्गेरीपरिसरः)
5. आर्यनः (तृतीयपुरस्कारः, वेदव्यासपरिसरः)



### परिसरस्तरे महिलायोग-स्पर्धासु प्राप्तपुरस्काराः -

1. आरती (प्रथमपुरस्कारः, श्रीरघुनाथकीर्तिपरिसरः)
2. विभामिश्रः (द्वितीयपुरस्कारः, लखनऊ-परिसरः)
3. रीतिका (द्वितीयपुरस्कारः, वेदव्यासपरिसरः)
4. आर्ची (तृतीयपुरस्कारः, भोपालपरिसरः)
5. धरित्री (तृतीयपुरस्कारः, एकलव्यपरिसरः)



## विश्व-योग-दिवसः - योग-उत्साहिनः आविश्वे सोत्साहं योगदिवसम् आचरितवन्तः




विश्व-योग-दिवसः सम्पूर्ण-विश्वे उत्साहेन परिपालितः। बांग्लादेशे अंताराष्ट्रीय-योग-दिवसस्य अवसरे ढाका-नगस्य मीरपुर क्षेत्रे शाहीद- सुहरावर्दी-इन्डोर क्रीडाङ्गणे भारतीय उच्चायोगेन भव्ययोगकार्यक्रमः आयोजितः। आयोजनस्थले उपस्थितान् योगानुरागिणः सम्बोधयन् कार्यवाहकः उच्चायुक्तः डॉ. बिनॉय-जॉर्जः प्रोक्तवान् यत् योगः भारतस्य बांग्लादेशस्य च जनानां शारीरिक-मानसिक-स्वास्थ्यस्य प्रवर्धनं कुर्वन् एकीकृत-शक्तिरूपेण कार्य कर्तुं शक्नोति। दुबई-देशे आयोजिते अंताराष्ट्रिय-योग- दिवस्य समारोहे पञ्चाशत्याधिक-एकशत तः अधिकाः जनाः भागं भजितवन्तः। श्रीलंकादेशे ऐतिहासिक गैले-दुर्गे अन्तर्राष्ट्रीययोगदिवसः आचर्यते। हम्बनटोटा-नगरस्य भारतस्य महावाणिज्य दूतावासेन गैल-नगरस्य यूनेस्को विश्वविरासत-स्थले अस्य समारोहस्य व्यवस्था कृता अस्ति।

## IYD विश्वयोगदिवसः- हिमाचलस्य सहस्रशः जनाः योगस्य अभ्यासं कृत्वा स्वस्थः भवितुं सन्देशं दत्तवन्तः, ऐतिहासिके रिजस्थले अभवत् मुख्यः कार्यक्रमः

हिमसंस्कृतवार्ताः - शिमला। विश्वयोगदिवसस्य अवसरे शुक्रवासरे हिमाचलप्रदेशस्य सर्वेषु जनपदेषु बहूनां कार्यक्रमाणाम् आयोजनं कृतम्। मुख्यकार्यक्रमस्य आयोजनं राज्यस्य आयुषविभागेन शिमलानगरस्य ऐतिहासिके रिजस्थले कृतम्। तत्र राज्यपालेन शिवप्रतापशुक्लवर्येण सहितं प्रायः एकसहस्रजनाः कूले योगाभ्यासं कृतवन्तः। कार्यक्रमे मुख्यातिथिरूपेण उपस्थितः राज्यपालः अवदत् यत् योगः भारतस्य परम्परायां वर्तते। भारतस्य ऋषिभिः सर्वेभ्यः जनेभ्यः दत्तं किन्तु तदर्थं वयं प्रधानमन्त्री नरेन्द्रमोदिने धन्यवादं दद्मः यत् स्वविशेषप्रयत्नेन अन्ताराष्ट्रीयस्तरस्य योगं कर्तुं एतादृशी व्यवस्था याचिता तथा च संयुक्तराष्ट्रसङ्घः २१ जून दिनाङ्कं विश्वयोगदिवसः इति घोषितवान्। अस्य परिणामः अस्ति यत् अद्य विश्वस्य १२४ तः अधिकेषु देशेषु आरब्धः योगस्य अभ्यासः वर्धमानः अस्ति।



योगः निरन्तरप्रक्रिया अस्ति, सर्वेषां जनानां स्वास्थ्यं मानसिकसन्तुलनं च निर्वाहयितुम् एतत् कर्तव्यम्। आयुषविभागस्य निदेशकः डॉ निपुणजिंदलः अवदत् यत् जिलास्तरे अपि कार्यक्रमाः आयोजिताः, मुख्यकार्यक्रमः ऐतिहासिके रिजस्थले अभवत्। एतदतिरिक्तं विभिन्नैः संस्थाभिः विभिन्नस्थानेषु अनेके कार्यक्रमाः आयोजिताः। अपरपक्षे राज्यस्य सर्वेषु राजकीयविद्यालयेषु योगासनं प्राणायामं च सम्पादितम्। अपरपक्षे भाजपादलेन विश्वयोगदिवसस्य अवसरे मण्डलस्तरस्य विविधाः कार्यक्रमाः अपि आयोजिताः। अस्मिन् काले जनाः विविधानि योगासनानि कुर्वन्ति स्म।

अमर-उजाला-द्वारा केन्द्रीयविद्यालये धर्मशालायाम् आचरितः योग-उत्सवः

तस्मिन् एव काले अमर उजाला द्वारा केन्द्रीय- विद्यालय- सङ्गठनस्य सहकारेण केन्द्रीयविद्यालयधर्मशालायाम् अन्ताराष्ट्रीययोगमहोत्सवस्य आयोजनं कृतम्। अस्मिन् अवसरे प्राचार्यः पुष्पशर्मा इत्यस्य नेतृत्वे विद्यालयस्य शतशः छात्राः शिक्षकाः च योगाभ्यासं कृतवन्तः। योगगुरु राखी शर्मा इत्यनया छात्रेभ्यः विभिन्नानां योगासनानाम् अभ्यासः कारितः।

# कामेश्वरसिंहदरभंगा संस्कृतविश्वविद्यालये अन्तर्राष्ट्रीययोगदिवसः

**हिमसंस्कृतवार्ताः, राघव नाथ झा दरभंगा।**

कामेश्वरसिंहदरभंगा संस्कृत विश्वविद्यालये अन्तर्राष्ट्रीययोगदिवसस्य अवसरं प्रति शुक्रवासरे मुख्यालयस्य दरबार हॉल इति स्थले योगाभ्यासं सह संगोष्ठी च आयोजिता आसीत्। कार्यक्रमस्य अध्यक्षता कुर्वन्तं प्रभारी कुलपतिं सह प्रतिकुलपतिं प्रो. सिद्धार्थ शंकर सिंह महोदयः उक्तवान् यत् प्रधानमन्त्री नरेंद्र दामोदरदास मोदी महोदयः संयुक्त राष्ट्रसंघस्य सम्मेलनस्य विश्वकल्याणाय सर्वेषां ध्यानं आकर्षयितुं योगस्य महत्त्वं प्रति ओजस्वीं भाषणं प्रदत्तवान्। ततः २१ जून मासे अन्तर्राष्ट्रीययोगदिवसस्य आयोजनं प्रस्तावितमिति यः सर्वसम्मतिसमेत्य स्वीकृतः। एतत् सम्मानः केवलं योगस्य न, अपि तु भारतीयपरंपरायाः अपि सम्मानः आसीत्। सः उक्तवान् यत् योगः शरीरस्य प्रत्येकं कोशिकां स्वस्थां च उत्तमां कर्तुं कार्यं करोति। नियमितं अभ्यासेन शरीरस्य रोगप्रतिरोधक क्षमता स्वयमेव बलवती भवति। योगस्य अन्तर्गतं मुख्यतः यम, नियम, आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यान इत्येतानि चरणबद्धरीत्या व्यवहारं आगच्छन्ति।

तत्र मुख्य अतिथि विश्वविद्यालयस्य पूर्व कुलपतिः प्रो. देवनारायण झा महोदयः योगं प्रति शास्त्रीयवर्णनं फोकस्समर्पितवान्। सः उक्तवान् यत् योगः अस्माकं दिनचर्यायाः एकं आवश्यकं भागं भवेत्। योगेन विविधानि दुःखानि शम्यन्ते। अस्याः पुष्टि श्रीमद्भगवद्गीतायां वर्णितं 'योगो भवति दुःखहा' इति श्लोकेन अपि भवति। सः अपि उक्तवान् यत् 'योगः कर्मसु कौशलम्', 'योगः समाधिः', 'समत्वं योग उच्यते' इत्यादीनि समाजे प्रसिद्धाः उक्तयः योगस्य महत्त्वं एव सूचयन्ति।

विशिष्टातिथिः स्नातकोत्तर प्रभारी प्रो. सुरेश्वर झा महोदयः उक्तवान् यत् 'युज् समाधौ', 'युज् संयमने', 'युजिर् योगे' इति तिसृभिः धातुभिः योगशब्दस्य उत्पत्तिः भवति। सः उक्तवान् यत् आसनस्य योगसूत्रे केवलं नाममात्रं उल्लेखः प्राप्तः। तदनन्तरं उक्तवान् यत् योगः केवलं 'योग दिवस' इति न, अपि तु 'संकल्प दिवस' इति अपि मन्यते।

तत्र धर्मशास्त्र विभागाध्यक्षः प्रो. दिलीप कुमार झा महोदयः विषयप्रवर्तनं कुर्वन् योगस्य विषयं प्रति उक्तवान् यत् अस्मिन्समये योगस्य अन्तर्राष्ट्रीयस्तरे महत्त्वं किमर्थं वर्धितमस्ति। सः उक्तवान् यत् योगेन केवलं शारीरिकं न अपितु मानसिकस्वास्थ्यं अपि लाभः प्राप्यते।



उक्तं जानकारीं प्रददत् पीआरओ निशिकांत महोदयः उक्तवान् यत् कार्यक्रमस्य आरम्भः दीपप्रज्वलनस्य माध्यमेन अभवत्। संचालकः गोपालकृष्ण मिश्रः लौकिकं मंगलाचरणं प्रस्तुतवान्। छात्राः नेहा कुमारी, श्रुति सिंह च विश्वविद्यालयस्य कुलगीतं गायन्तः।

कुलसचिवः डॉ. दीनानाथ साह महोदयः स्वागत भाषणं तथा अध्यक्ष छात्र कल्याण डॉ. शिवलोचन झा महोदयः धन्यवादज्ञापनं प्रस्तुतवन्तः। सः उक्तवान् यत् योग तथा भारतीयज्ञानपरंपरा प्रति एते कार्यक्रमाः विश्वविद्यालये निरन्तरं आयोज्यन्ते इति। योगप्रशिक्षकः शशि भूषण गुप्ता तथा डॉ. उपासना सिंह योगाभ्यासं करितवन्तौ। एनएसएस पदाधिकारीः डॉ. सुधीर कुमार झा महोदयस्य देखरेखायां आयोजिते अस्मिन्स कार्यक्रमे संयोजकः शिक्षाशास्त्रविभागस्य पवन सहनी तथा सहसंयोजकः राष्ट्रीय सेवा योजनायाः रामेश्वर लता संस्कृत महाविद्यालय, दरभंगा इत्यत्र समन्वयकः डॉ. मुकेश प्रसाद निराला महोदयः आसीत्। अस्यां संगोष्ठ्यां वेदविभागाध्यक्षः डॉ. विनय कुमार मिश्र, ज्योतिषविभागाध्यक्षः डॉ. कुणाल कुमार झा, व्याकरणविभागाध्यक्षः प्रो. दयानाथ झा, दर्शनविभागाध्यक्षः डॉ. शम्भू शरण तिवारी, सी.सी.डी.सी. डॉ. दिनेश झा, विकास सह बजट पदाधिकारीः डॉ. पवन कुमार झा, विधिपदाधिकारीः डॉ. कृष्णा नन्द मिश्र, परीक्षानियन्त्रकः डॉ. शैलेन्द्र मोहन झा, सह परीक्षानियन्त्रकः डॉ. तेज नारायण झा, उपकुलसचिवः डॉ. सुनील कुमार झा, डॉ. रविन्द्र कुमार मिश्र, विजय शंकर झा, अभिमन्यु कुमार, सुशील कुमार झा, आनंद भास्कर, सुधीर कुमार सिंह च सहित सर्वे कर्मिणः उपस्थिताः।

# धारावाहिकं गीताप्रश्नोत्तरम् -६६



अर्जुनः - भगवन् ! अहमपि संसारसागरात् विमुक्तिं कामये । परन्तु तादृशः भक्तोऽहं भवितुमर्हेयं वा ?

श्रीकृष्णः - कुतः न अर्जुन ! प्रथमतः त्वं स्वमनः मयि एव निवेशय । भवद्बुद्धिमपि निवेशय । यदि एवं मनोबुद्ध्यादिकं सर्वं मयि एव अर्पयसि, तर्हि त्वम् ऊर्ध्वं मयि एव निवत्स्यसि, अत्र नैव संशयः । यदि एवं मनोबुद्धी स्थिरीकर्तुं त्वम् असमर्थः स्याः, तर्हि अभ्यासयोगेन मां प्राप्तुमिच्छ । अभ्यासयोगेऽपि यदि त्वम् असमर्थः असि, तर्हि मम परायणः भव । एवं मदर्थमपि कर्माणि कुर्वन् त्वं सिद्धिं प्राप्स्यसि । एवमेव मदर्थमपि कर्माणि कर्तुं यदि त्वम् असमर्थः असि, तर्हि त्वं दृढतापूर्वकं मम भक्तियोगम् अवलम्ब्य, मनोबुद्धी वशीकुर्वन् च सर्वमपि कर्मफलं त्यज।

अर्जुनः - भगवन् ! कर्मफलत्यागविषये भवता अन्ते उक्तम्, किमेतत्साधनं निकृष्टं वा ?

श्रीकृष्णः - नहि अर्जुन ! समयोगरहितात् अभ्यासात् शास्त्रीयज्ञानं श्रेष्ठम् । एवं समयोगरहितात् शास्त्रीयज्ञानात् ध्यानं श्रेष्ठम् । तथैव समयोगरहितात् ध्यानात् कर्मफलत्यागः श्रेष्ठः । यतोहि त्यागात् यः कोऽपि समभावयुक्तः त्यागी अचिरादेव परमां शान्तिं प्राप्नोति ।

अर्जुनः - त्वां प्राप्तुकामस्य सिद्धभक्तस्य लक्षणानि कानि सन्ति भगवन् ?

श्रीकृष्णः - एतादृशः मम भक्तः कञ्चनापि प्राणिनं न कदापि द्वेष्टि । तस्य समस्तप्राणिभिः सह मित्रता, प्रेम वा भवति । सर्वेषु प्राणिषु करुणा भवति, यतोहि दयालुता तस्य स्वाभाविकी, नैजप्रवृत्तिः वा स्यात् । सः मद्भक्तः अहंममत्वरहितः, क्षमाशीलः, सुखदुःखादिकस्य प्राप्तौ सर्वदा समभावेन तिष्ठति, अर्थात् प्राप्तपरिस्थितौ सन्तुष्टः तिष्ठति, न कदापि विचलितः भवति इत्यर्थः । सः सर्वदा हि मय्येव समर्पितमनोबुद्धिः भवति । शरीरमिन्द्रियाणि मनश्च तस्य वशीभूतानि भवन्ति । तस्मिन् भक्ते एतादृशाः सद्गुणाः नित्यं तिष्ठन्ति । अतः तादृशः मत्परायणः भक्तः मम अत्यन्तं प्रियः भवति । किं मद्वचनं त्वया सम्यक् श्रुतं, ज्ञातं च अर्जुन ? अस्त्विति । (११/८-१४)

(अनुवर्तिष्यते) -- नारदोपाध्यायः।

# ।। श्रीरामायणकथा ।।





हिमसंस्कृतवार्ता, प्रदीपः
pradipnath997@gmail.com

## उत्तरकाण्डम् (सप्तविंशः सर्गः)

### हनुमतः जन्मवृत्तान्तकथनम् (चतुर्थः खण्डः)

ततः ऋषीणां शापप्रभावात् एषः हनुमान् बलहीनः सन् मृदुभावं गत्वा आश्रमेषु चरति स्म। ऋक्षरजसो नाम तेजसा भास्कर इव बालिसुग्रीवयोः पिता सर्ववानराणां राजा आसीत्। सः चिरं राज्यं कृत्वा कालधर्मेण योजितः अभवत्। तस्मिन् अस्तमिते मन्त्रिभिः मन्त्रकोविदैः पितुः पदे बाली कृतः सुग्रीवः च बालिनः पदे कृतः। सुग्रीवेण सह तु अस्य आबाल्यम् अद्वैतं छिद्रवर्जितं सख्यं विद्यते। हे राम ! एषः मारुतिः शापवशात् आत्मनः बलं न जानाति स्म। यदा बालिसुग्रीवयोः वैरं समुत्थितं तदा बालिना सुग्रीवः भ्राम्यमाणोऽपि हनुमन्तं तस्य बलं स्मारयितुं न अशक्नोत्। ऋषिशापात् हृतबलः एषः कपिसत्तमः सिंहः कुञ्जररुद्धः यथा सुग्रीवेण सह सर्वदा तिष्ठति स्म। पराक्रमः, उत्साहः, बुद्धिः, प्रतापः, धैर्यं, सुशीलता, माधुर्यं, नीतिज्ञानं, चातुर्यं, गाम्भीर्यं, वीर्यम् इत्यादिभिः गुणैः अलङ्कृतस्य हनुमतः अपेक्षया अन्यः कोऽस्ति अस्मिन् लोके!

एषः कपीन्द्रः व्याकरणम् अध्येतुं सूर्योन्मुखः उद्यद्गिरेः अस्तगिरिम् अगच्छत्। शास्त्रे वैशारदे तथैव छन्दोगतौ च अस्य सदृशः कश्चिदपि नास्ति। सर्वासु विद्यासु एषः सुराणां गुरुं प्रस्पर्धते। अनलस्य यथा हनुमतः पुरस्तात् कश्चिदपि न स्थास्यति। हे राम! त्वत्कारणाद्धि अस्य सदृशाः अन्ये महाकपीन्द्राः सुग्रीवमैन्दद्विविदाः अङ्गदनीलनलरम्भाः सुरैः सृष्टाः। हे राम! यत् त्वं मां परिपृच्छसि तत् सर्वं मया कथितम्। महर्षिणा अगस्त्येन कथितं श्रुत्वा राक्षसैः सह रामः लक्ष्मणः वानराः सर्वे परमं विस्मयम् अगच्छन्। ततः महर्षिः अगस्त्यः अब्रवीत् हे राजन्! मया उक्तं सर्वं त्वया श्रुतम्, इदानीं वयं गच्छामः। महर्षेः वाक्यं श्रुत्वा प्राञ्जलिः प्रणतश्चापि रामः अब्रवीत् भगवन्! युष्माकं दर्शनात् अद्य मम प्रपितामहः पितरः सबान्धवाः देवाश्च तुष्टाः अभूवन्, किन्तु अहं युष्मभ्यं यद् निवेदयामि तद् युष्माभिः मम कृते अनुकम्पया कर्तव्यम्। अहं युष्माकं प्रभावात् यज्ञानुष्ठानं करिष्यामि। मम यज्ञेषु ममानुग्रहकाङ्क्षिणः यूयं नित्यं सदस्याः भविष्यथ। श्रीरामस्य वचनं श्रुत्वा अगस्त्यादयः संशितव्रताः ऋषयः एवमस्तु इति रामम् उक्त्वा सर्वे यथागतं गताः। राघवः तदा ऋषेः अगस्त्यस्य वचनं स्मृत्वा विस्मितः अभवत्। ततः भास्करे अस्तं याते श्रीरामः नृपवानरान् विसृज्य विधिवत् सन्ध्यामुपास्य अन्तःपुरं प्राविशत्।

हिमसंस्कृतवार्तायै सहयोगं कुर्वन्तु
हिमसंस्कृतवार्ताः
संस्कृतकार्यमिदम् पुण्यकार्यमिदम्
इदं संस्कृताय न मम